# श्रीमद् भागवत रसिक कुटुंब

## ॥ श्री गीत गोविंद॥



### ॥ एकादशः(स्) सर्गः॥(सानन्द गोविन्द)

(मालिनी)

सुचिरमनुनयेन प्रीणयित्वा मृगाक्षीं(ङ्)
गतवति कृतवेशे केशवे कुञ्जशय्याम् ।
रचितरुचिरभूषां(न्) दृष्टिमोषे प्रदोषे
स्फुरति निरवसादां(ङ्) कापि राधां(ञ्) जगाद ॥ 1॥

॥ गीतम् 20 ॥

(अथ विं(म्)शः(फ्) प्रबन्धो वसन्तरागेण रूपकताले गीयते)

विरचितचाटुवचनरचनं(ञ्) चरणे रचितप्रणिपातम् ।
सम्प्रति मञ्जुलवञ्जुलसीमनि केलिशयनमनुयातम् ॥
मुग्धे मधुमथनमनुगतमनुसर राधिके ॥ 1॥

घनजघनस्तनभारभरे दरमन्थरचरणविहारम् ।
मुखरितमणिमञ्जीरमुपैहि विधेहि मरालविकारम् ॥ 2॥ मुग्धे

शृणु रमणीयतरं(न्) तरुणीजनमोहनमधुरिपुरावम् ।
कुसुमशरासनशासनवन्दिनि पिकनिकरे भज भावम् ॥ 3॥ मुग्धे

अनिलतरलकिसलयनिकरेण करेण लतानिकुरम्बम् ।
प्रेरणमिव करभोरु करोति गतिं(म्) प्रतिमुञ्च विलम्बम् ॥ 4॥ मुग्धे

स्फुरितमनङ्गतरङ्गवशादिव सूचितहरिपरिरम्भम् ।
पृच्छ मनोहरहारविमलजलधारममुं(ङ्) कुचकुम्भम् ॥ 5॥ मुग्धे

अधिगतमखिलसखीभिरिदं(न्) तव वपुरपि रतिरणसज्जम् ।
चण्डि रणितरशनारवडिण्डिममभिसर सरसमलज्जम् ॥ 6॥ मुग्धे

स्मरशरसुभगनखेन करेण सखीमवलम्ब्य सलीलम् ।
चल वलयक्वणीतैरवबोधय हरिमपि निजगतिशीलम् ॥ 7॥ मुग्धे

श्रीजयदेवभणितमधरीकृतहारमुदासितवामम् ।
हरिविनिहितमनसामधितिष्ठतु कण्ठतटीमविरामम् ॥ 8॥ मुग्धे

(शार्दूलविक्रीडितेन)

सा मां(न्) द्रक्ष्यति वक्ष्यति स्मरकथां(म्) प्रत्यङ्गमालिङ्गनैः(फ्)
प्रीतिं(यँ) यास्यति रं(म्)स्यते सखि समागत्येति चिन्ताकुलः ।
स त्वां(म्) पश्यति वेपते पुलकयत्यानन्दति स्विद्यति
प्रत्युद्गच्छति मूर्च्छति स्थिरतमः(फ्)पुञ्जे निकुञ्जे प्रियः ॥ 2॥

(शार्दूलविक्रीडितेन)

अक्ष्णोर्निक्षिपकज्जलं(म्) श्रवणयोस्तापिच्छगुच्छावलीं(म्)
मूर्ध्नि श्यामसरोजदाम कुचयोः(ख्) कस्तूरिकापत्रकम् ।

धूर्तानामभिसारसत्वरहृदां(वँ) विष्वङ्निकुञ्जे सखि
ध्वान्तं(न्) नीलनिचोलचारु सुदृशां(म्) प्रत्यङ्गमालिङ्गति ॥ 3॥

(वसंततिलकावृत्तम्)

काश्मीरगौरवपुषामभिसारिकाणा-
माबद्धरेखमभितो रुचिमञ्जरीभिः ।
एतत्तमालदलनीलतमं(न्) तमिस्रं(न्)
तत्प्रेमहेमनिकषोपलतां(न्) तनोति ॥ 4॥

(वसंततिलकावृत्तम्)

हारावलीतरलकाञ्चनकाञ्चिदाम-
केयूरकङ्कणमणिद्युतिदीपितस्य ।
द्वारे निकुञ्जनिलयस्य हरिं(न्) निरीक्ष्य
व्रीडावतीमथ सखी निजगाह राधाम् ॥ 4॥

## ॥ गीतम् 21 ॥

(अथ एकविं(म्)शतितमः(फ्) प्रबन्धो वराडीरागेण अडवताले गीयते)

मञ्जुतरकुञ्जतलकेलिसदने ।
विलस रतिरभसहसितवदने ॥
प्रविश राधे माधवसमीपमिह ॥ 1॥

नवभवदशोकदलशयनसारे ।
विलस कुचकलशतरलहारे ॥ 2॥ प्रविश

कुसुमचयरचितशुचिवासगेहे ।
विलस कुसुमसुकुमारदेहे ॥ 3॥ प्रविश

मृदुचलमलयपवनसुरभिशीते ।
विलस रसवलितललितगीते ॥ 4॥ प्रविश

विततबहुवल्लिनवपल्लवघने ।
विलस चिरमिलितपीनजघने ॥ 5॥ प्रविश

मधुमुदितमधुपकुलकलितरावे ।
विलस दशनरभसरसभावे ॥ 6॥ प्रविश

मधुरतरपिकनिकरनिनदमुखरे ।
विलस दशनरुचिरुचिरशिखरे ॥ 7॥ प्रविश

विहितपद्मावतीसुखसमाजे ।
भणति जयदेवकविराजे ।
कुरु मुरारे मङ्गलशतानि ॥ 8॥ प्रविश

(शार्दूलविक्रीडितेन)

त्वां(ञ्) चित्तेन चिरं(वँ) वहन्नयमतिश्रान्तो भृशं(न्) तापितः
कन्दर्पेण तु पातुमिच्छति सुधासम्बाधबिम्बाधरम् ।

अस्याङ्गं(न्) तदलं(ङ्)कुरु क्षणमिह भ्रूक्षेपलक्ष्म्यास्तव-
क्रीते दास इवोपसेवितपदाम्भोजे कुतः(स्) सम्भ्रमः ॥ 6॥

(अनुष्टुप)

सा ससाध्वससानन्दं(ङ्) गोविन्दे लोललोचना ।
सिञ्जाना मञ्जुमञ्जीरं(म्) प्रविवेश निवेशनम् ॥ 2॥

## ॥ गीतम् 22 ॥

(अथ द्वाविं(म्)शतितमः(फ्) प्रबन्धो वराडीरागेण रूपकताले गीयते)

राधावदनविलोकनविकसितविविधविकारविभङ्गम् ।
जलनिधिमिव विधुमण्डलदर्शनतरलिततुङ्गतरङ्गम् ॥
हरिमेकरसं(ञ्) चिरमभिलषितविलासं(म्)
सा ददर्श गुरुहर्षवशं(वँ्)वदवदनमनङ्गनिवासम् ॥ 1॥

हारममलतरतारमुरसि दधतं(म्) परिरभ्य विदूरम् ।
स्फुटतरफेनकदम्बकरम्बितमिव यमुनाजलपूरम् ॥ 2॥ हरिमेकरसं

श्यामलमृदुलकलेवरमण्डलमधिगतगौरदुकूलम् ।
नीलनलिनमिव पीतपरागपटलभरवलयितमूलम् ॥ 3॥ हरिमेकरसं

तरलदृगञ्चलचलनमनोहरमदनजनितरतिरागम् ।
स्फुटकमलोदरखेलितखञ्जनयुगमिव शरदि तडागम् ॥ 4॥ हरिमेकरसं

वदनकमलपरिशीलनमीलितमिहिरसमकुण्डलशोभम् ।
स्मितरुचिरुचिरसमुल्लसिताधरपल्लवकृतरतिलोभम् ॥ 5॥ हरिमेकरसं

शशिकिरणच्छुरितोदरजलधरसुन्दरकुसुमकेशम् ।
तिमिरोदितविधुमण्डलनिर्मलमलयजतिलकनिवेशम् ॥ 6॥ हरिमेकरसं

विपुलपुलकभरदन्तुरितं(म्) रतिकेलिकलाभिरधीरम् ।
मणिगणकिरणसमूहसमुज्ज्वलभूषणसुभगशरीरम् ॥ 7॥ हरिमेकरसं

श्रीजयदेवभणितविभवद्विगुणीकृतभूषणभारम् ।
प्रणमत हृदि सुचिरं(वँ) विनिधाय हरिं(म्) सुकृतोदयसारम् ॥ 8॥हरिमेकरसं

(शिखरिणी)

अतिक्रम्यापाङ्गं(म्) श्रवणपथपर्यन्तगमन-
प्रयासैनेवाक्ष्णोस्तरलतरतारं(ङ्) गमितयोः ।
इदानीं(म्) राधायाः(फ्) प्रियतमसमायात्समये
पपात स्वेदाम्बुप्रसर इव हर्षाश्रुनिकरः ॥ 8॥

(शिखरिणी)

भजन्त्यास्तल्पान्तं(ङ्) कृतकपटकण्डूतिपिहित-
स्मितं(यँ) याते गेहाद्बहिरवहितालीपरिजने ।
प्रियास्यं(म्) पश्यन्त्याः(स्) स्मरशरवशाकूतसुभगं(म्)
सलज्जाया लज्जा व्यगमदिव दूरं(म्) मृगदृशः ॥ 9॥

(शिखरिणी)

जयश्रीविन्यस्तैर्महित इव मन्दारकुसुमैः(स्)
स्वयं(म्) सिन्दूरेण द्विपरणमुदा मुद्रित इव ।
भुजापीडक्रीडाहतकुवलयापीडकरिणः(फ्)
प्रकीर्णासृग्बिन्दुर्जयति भुजदण्डो मुरजितः ॥ 10॥

इति श्रीगीतगोविन्दे राधिकामिलने सानन्दगोविन्दो नामैकादशः सर्गः

